श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री-अष्टभुजाष्टकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री-अष्टभुजाष्टकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

गजेन्द्ररक्षात्वरितं भवन्तं
ग्राहैरिवाहं विषयैर्विकृष्टः।
अपारविज्ञानदयानुभावम्
आप्तं सतामष्टभुजं प्रपद्ये॥ १ ॥

त्वदेकशेषोऽहमनात्मतन्त्रः
त्वत्पादलिप्सां दिशता त्वयैव।
असत्समोऽप्यष्टभुजास्पदेश
सत्तामिदानीमुपलम्भितोऽस्मि॥ २ ॥

स्वरूपरूपास्त्रविभूषणाद्यैः
परत्वचिन्तां त्वयि दुर्निवाराम्।
भोगे मृदूपक्रमतामभीप्सन्
शीलादिभिर्वारयसीव पुंसाम्॥ ३ ॥

शक्तिं शरण्यान्तरशब्दभाजां
सारं च सन्तोल्य फलान्तराणाम्।
त्वद्दास्यहेतोस्त्वयि निर्विशङ्कं
न्यस्तात्मनां नाथ बिभर्षि भारम्॥ ४ ॥

अभीतिहेतोरनुवर्तनीयं
नाथ त्वदन्यं न विभावयामि।
भयं कुतः स्यात् त्वयि सानुकम्पे
रक्षा कुतः स्यात् त्वयि जातरोषे॥ ५ ॥

www.prapatti.com

त्वदेकतन्त्रं कमलासहाय
स्वेनैव मां रक्षितुमर्हसि त्वम्।
त्वयि प्रवृत्ते मम किं प्रयासैः
त्वय्यप्रवृत्ते मम किं प्रयासैः॥ ६ ॥

समाधिभङ्गेष्वपि सम्पतत्सु
शरण्यभूते त्वयि बद्धकक्ष्ये।
अपत्रपे सोढुमकिञ्चनोऽहं
दूराधिरोहं पतनं च नाथ॥ ७ ॥

प्राप्ताभिलाषं त्वदनुग्रहान्मां
पद्मानिषेव्ये तव पादपद्मे।
आदेहपातादपराधदूरम्
आत्मान्तकैङ्कर्यरसं विधेयाः॥ ८ ॥

प्रपन्न जनपाथेयं प्रपित्सूनां रसायनम्।
श्रेयसे जगतामेतत् श्रीमदष्टभुजाष्टकम्॥ ९ ॥

शरणागतसन्त्राणत्वराद्विगुणबाहुना।
हरिणा वेङ्कटेशीया स्तुतिः स्वीक्रियतामियम्॥ १० ॥

॥ इति श्री-अष्टभुजाष्टकं समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com